National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(65): 35-39
© 2026 NJHSR
www.sanskritarticle.com

**डॉ. हेमन्तकुमार नेपाल**
सहायक प्राध्यापक,
सिक्किम सकारी संस्कृत महाविद्यालय,
साम्दोङ, गान्तोक सिक्किम

**Correspondence:**
**डॉ. हेमन्तकुमार नेपाल**
सहायक प्राध्यापक,
सिक्किम सकारी संस्कृत महाविद्यालय,
साम्दोङ, गान्तोक सिक्किम

# मृच्छकटिकाधारेण आदर्शः चरित्रं चारुदत्तः

**डॉ. हेमन्तकुमार नेपाल**

**शोधसारः-**

शूद्रकविरचिते मृच्छकटिके चारुदत्तः आदर्शवादीचरित्ररूपेण विशेषतया निरूपितः अस्ति। स ब्राह्मणः वाणिकः सन् अपि उच्चनैतिकमूल्यानां प्रतिनिधित्वं करोति। नाटके तस्य चरित्रे सत्यनिष्ठा, स्वाभिमानः, दानशीलता, करुणा, त्यागः, उत्तरदायित्वबोधश्च स्पष्टतया दृश्यन्ते। आर्थिकविपत्तौ अपि चारुदत्तः असत्यवचनं न स्वीकरोति। न च परद्रव्ये आश्रयं कर्तुं स्वाभिमानात् इच्छति। न्यासपूरणार्थं भिक्षाटनमपि श्रेयस्करं मन्यते यत् तस्य चरित्रशुद्धेः प्रमाणं भवति। चारुदत्तस्य दाम्पत्यजीवने पत्न्या सह परस्परसहायभावः, विश्वासः, सौहार्दं च आदर्शरूपेण प्रस्तुतं भवति। पत्नीप्रदत्तधनग्रहणे स खेदं अनुभवति। यतो हि स पौरुषादर्शं रक्षितुं प्रयतते। समाजे मित्रत्वं, दया, क्षमा, परहितभावना च तस्य व्यवहारस्य मूलाधाराः सन्ति। वसन्तसेनाप्रकरणे अपि स सत्यपालनं तथा व्यवहारनिष्ठां न परित्यजति। अतः चारुदत्तः केवलं नाट्यचरित्रं नास्ति अपि तु आदर्शगृहस्थस्य, नैतिकनागरिकस्य च प्रतिमानमस्ति। मृच्छकटिके तस्य चरित्रनिर्माणेन कविना आदर्शवादः, मानवमूल्यानां महत्त्वं च समाजस्य समक्षं स्थापितम्। चारुदत्तस्य चरित्रं सर्वकाले सर्वसमाजे अनुकरणीयम् इति निश्चयेन वक्तुं शक्यते।

**कुञ्जिशब्दाः**- चारुदत्तः, मृच्छकटिकम्, आदर्शवादः, सत्यनिष्ठा, स्वाभिमानः, दानशीलता

**परिचयः-**

आदर्शः इति शब्दः सामान्यतः कस्यापि व्यक्तेः, वस्तुनः वा विचारस्य बोधकः भवति। यस्य रूपं, गुणः, चरित्रं तथा विचाराः अनुकरणीयाः स्युः। यः सर्वगुणसम्पन्नः, सर्वोत्तमः, पूर्णतां प्राप्तः च भवति स एव आदर्शः कथ्यते। आदर्शस्य परिभाषा "आदर्शो यथा स्यात् तथा वदनम्" इति उच्यते। यः यथार्थरूपेण जीवनमूल्यानां प्रतिपादनं करोति, स एव समाजस्य कृते आदर्शः भवति। यत् किमपि विचारं, मानसप्रतिबिम्बं, परिकल्पनां, अवधारणां, योजनां, परामर्शं वा उपदेशं सूचयति, तस्य आङ्ग्लभाषायां Idea इति पर्यायः प्रचलितः अस्ति। अस्य संस्कृतपर्यायः 'विचारः' इति शब्दः भवति। यः व्यक्तिः वा वस्तुः विचाराय सन्तोषप्रदं भवति सः Ideal इति कथ्यते। संस्कृतभाषायां 'आदर्शः' शब्दस्य आङ्ग्लपर्यायः Ideal एव अस्ति। 'आदर्शः' इति शब्दः आङ् उपसर्गपूर्वकात् दृश् धातोः घञ् प्रत्ययस्य योजनेन निष्पद्यते। वामनशिवराम आप्टेन सङ्कलिते संस्कृत-हिन्दी कोशे अस्य शब्दस्य अर्थाः दर्पणः, टीका, प्रतिपुस्तकम्, प्रतिलिपिनिर्माणार्थं प्रयोज्यं पाण्डुलिपिरूपं पुस्तकं च इत्यादिरूपेण प्रदत्ताः सन्ति।[1] तथापि अस्मिन् कोशे 'आदर्शः' इति शब्दस्य अनुकरणीयविचाराचाररूपेण, भावात्मकस्वरूपेण वा व्याख्या न दत्ताऽस्ति। श्रीमद्भगवद्गीतायां स्वच्छचरित्रं आदर्शरूपेण लक्षितं दृश्यते।[2] वस्तुतः यथार्थस्य विपरीतं कल्पनामाध्यमेन विचाराश्रितं तत्त्वमेव आदर्शः कथ्यते। राजपालप्रकाशिते संक्षिप्तहिन्दी-शब्दकोशेऽपि 'आदर्शः' शब्दस्य श्रेष्ठतमावस्था, प्रतिमानं, पराकाष्ठारूपं, अनुकरणीयमुदाहरणम् इत्यादि-रूपेण व्याख्या दत्ता अस्ति।[3]

अत्रापि अवस्थारूपेण, संकेतस्वरूपेण, अनुकरणीयवस्तुरूपेण च आदर्शस्य अर्थः स्पष्टः भवति किन्तु नैसर्गिकस्वभावगुणात्मकविचाराचाररूपेण आदर्शस्य व्याख्या न दृश्यते। अतः प्रभावगतदृष्ट्या आदर्शः कथं भवति इति विषयः स्पष्टतया न अवगम्यते। नेपाली बृहत् शब्दकोशेऽपि आदर्शशब्दस्य विविधरूपेण व्याख्या प्राप्ता भवति। रूपं, गुणाः, विचाराः च यस्य अनुकरणीयाः सन्ति, सः व्यक्ति, पदार्थः वा सिद्धान्तः आदर्शः इति स्वीक्रियते। यः कश्चन वस्तुः वा क्रिया पूर्णतां प्राप्तः उत्तमोत्कृष्टनिदर्शनं भवति, स एव आदर्शः कथ्यते। सतः, नैयायिकः, गुणशीलः, मानवीयस्वभावयुक्तः व्यक्ति आदर्शरूपेण परिगण्यते।

मानवसमाजे ये जनाः रोगशोकबुभुक्षादुःखादिभिः अतिक्रान्ताः सन्ति। ते आदर्शजीवनस्य प्रतीकाः भवन्ति। मानवः सर्वदा आदर्शं लक्षीकृत्य लक्ष्यसिद्धये प्रवर्तते चेत् विश्वं नूनं सुन्दरं, सुखदं च भविष्यति। एतादृशं सर्वगुणसम्पन्नं चरित्रं साहित्ये वा काव्ये यदा स्थापितं भवति, तदा तत् 'आदर्शचरित्रम्' इति कथ्यते। आदर्शस्य गुणाः, नीतिनियमाः अपि आदर्शरूपेण स्वीक्रियन्ते। आदर्शस्य अनुयायी 'आदर्शवादी' इति कथ्यते। कल्पनामाध्यमेन विवेचितं विज्ञानस्य किञ्चन शाखारूपं चिन्तनमपि आदर्शः इति कथ्यते। कस्यचित् वस्तुनः वा कार्यस्य आदर्शमाध्यमेन प्रस्तुता क्रिया अपि आदर्शरूपेण परिगण्यते[4]। एतस्मात् स्पष्टं भवति यत् कोशेषु आदर्शशब्दस्य बहुविधार्थाः निर्दिष्टाः सन्ति। साहित्ये वा काव्ये प्रयुक्तस्य आदर्शचरित्रस्य स्वरूपं, स्वभावं, महत्त्वं च अनेन विवेचनेन स्पष्टं भवति। आदर्शशब्दस्य प्रयोगः विशेषतः नैतिकदार्शनिकविचाराचारस्य सन्दर्भे एव दृश्यते। अतः साहित्ये आदर्शचरित्रस्य प्रयोगः नैतिकाध्यात्मिकमूल्यानां प्रदर्शनाय भवति। आदर्शचरित्रः उच्चनैतिकः, आध्यात्मिकः, सौन्दर्ययुक्तः च भवति। यस्य प्रतिमानमनुसृत्य समाजः स्वजीवनं नियोजयितुं प्रयत्नं करोति। आदर्शवादी चरित्रः समाजस्य, सम्प्रदायस्य, वर्गविशेषस्य च वर्तमानावस्थां निरीक्ष्य असन्तोषं अनुभूय नूतनादर्शस्य अन्वेषणं करोति। तेन भौतिकजीवने वा आधुनिकसमाजे स्वर्गस्य, सत्ययुगस्य, रामराज्यस्य, शोषणरहितसमाजस्य च स्थापना प्रति प्रयत्नः क्रियते। साहित्ये आदर्शचरित्रमाध्यमेन सर्वोच्चनैतिकसमाजस्य कल्पना क्रियते।[5] आदर्शचरित्रस्य माध्यमेन जीवनजगतः केवलं सत्पक्षस्य अनुगमनं, अनुकरणं च प्रेर्यते। अत्र सत्यं, शिवं, सुन्दरं, मर्यादा च अभिलष्यन्ते। भौतिकसुखं परित्यज्य आन्तरिकसुखं, मानसिकशान्तिः, प्रसन्नता, परितोषः, आनन्दः च अधिकमहत्त्वं प्राप्नुवन्ति। परमानन्दप्राप्तये भौतिकसुखत्यागः एव आदर्शजीवनस्य लक्ष्यं भवति। समस्तदुर्गुणानां परित्यागः, समग्रमानवीयगुणानां ग्रहणं च आदर्शचरित्रस्य मूलं भवति। चरित्रमाध्यमेन समतायुक्तं, भेदभावरहितं, सुखसमृद्धं समाजनिर्माणस्य प्रयासः क्रियते। व्यवहारशुद्धता, कोमलता, मानवीयसंवेदना, समानदृष्टिः, आध्यात्मिकभावना, परमसत्यकल्पना, सत्पक्षधरता एतानि आदर्शचरित्रस्य प्रमुखवैशिष्ट्यानि सन्ति। पूर्वीयसाहित्यपरम्परायां आदर्शभावनायाः सर्वत्र सर्वोपरी स्थानं दृश्यते। तथापि अत्र आदर्शः इति शब्दः आदर्शवादरूपेण विशेषतया विवेचितो नास्ति। आदर्शवादः पाश्चात्यकाव्यशास्त्रे विशेषतया मान्यः अस्ति। ईसा-पूर्वं ४२७ तः ३४५ पर्यन्तं जीवितः प्लेटो महाभागः आदर्शवादस्य संस्थापकः मन्यते। तदनन्तरं जर्मनदार्शनिकः इमानुएल् काण्टः (१७२४–१८०४) आदर्शवादस्य प्रमुखव्याख्याता आसीत्। तस्य मतानुसारं पदार्थज्ञानं मानवस्य इन्द्रियानुभवेन सह सम्बद्धं भवति। किन्तु वैचारिकपक्षे बुद्धेः एव क्रियाव्यापारः भवति। सः बुद्धेः द्विविधस्वरूपं प्रतिपादयति शुद्धबुद्धिः तथा व्यवहारिकबुद्धिः। शुद्धबुद्धिः एव आदर्शभावनायाः कारणम् इति तेन प्रतिपादितम्। तदनन्तरं जर्मनदार्शनिकः हीगेलः (१७७०-१८३१) आदर्शवादस्य विकासे महत्वपूर्णं योगदानं कृतवान्। तस्य मतानुसारं जड-चेतनात्मकसृष्टेः मूलतत्त्वं 'विश्वात्मा' अस्ति। सः सर्वज्ञरूपेण बुद्धेः अवस्थां प्रतिपादयति। वस्तुतः आदर्शभावना एव आदर्शवादस्य धरातलम् अस्ति। अत्र मानवजीवनस्य आन्तरिकपक्षः विशेषतया चित्रितः भवति।

**आदर्शः चरित्रं चारुदत्तः-**

रूपकं संवादभिनयकलामाध्यमेन कथावस्तुनः सम्प्रेषणस्य प्रमुखसाधनम् अस्ति। रूपके पात्रं वा चरित्रं सर्वाधिकमहत्त्वपूर्णं भवति। चरित्ररहितस्य रूपकस्य कल्पना अपि कर्तुं न शक्यते। आख्यानप्रधानसाहित्ये चरित्रवर्णनं आख्यानकारेण क्रियते। परन्तु रूपके संवादमाध्यमेन चरित्रस्य सजीवचित्रणं भवति। अतः चरित्रं रूपकस्य प्राणतत्त्वं मन्यते। पूर्वीयनाट्यपरम्परायां नायकस्य विशेषचर्चा दृश्यते। 'नायक' शब्दः नी धातोः निष्पन्नः। यस्य अर्थः कथासूत्रस्य नेतृत्वं कर्तुम् इति भवति। नाट्यशास्त्रे नायकाः चतुर्विधाः धीरोदात्तः, धीरउद्धतः, धीरललितः, धीरप्रशान्तश्च। प्रकरणमपि रूपकस्य एकः प्रमुखभेदः अस्ति। यः संवादात्मकः अभिनयात्मकश्च भवति। अस्य अध्ययनस्य केन्द्रबिन्दुः शूद्रकविरचितस्य मृच्छकटिकम् इति प्रकरणस्य नायकः आर्यचारुदत्तः अस्ति। सः धीरप्रशान्तनायकवर्गे अन्तर्भवति। धीरप्रशान्तनायकः स्वभावतः शान्तः, करुणालुः, त्यागशीलः, आदर्शगुणसम्पन्नः च भवति। मृच्छकटिकम् इति प्रकरणस्य नायकः दरिद्रवाणिकः आर्यचारुदत्तः अत्यन्तं आदर्शगुणयुक्तः दृश्यते। तस्य दरिद्रता भौतिका अस्ति न तु चारित्रिका। शूद्रकाले अवन्तिपुरीनगरस्य आर्थिक, सामाजिक, राजनैतिक, व्यवहारिक, शैक्षिक, सांस्कृतिकस्थितयः चारुदत्तस्य आदर्शचरित्रमाध्यमेन नाटककारेण प्रभावोत्पादकरूपेण चित्रिताः सन्ति। अतः नाटककारः कथयति-

**अवन्तिपुर्यां द्विजसार्थवाहो युवा दरिद्रः किल चारुदत्तः।**
**गुणानुरक्ता गणिका च यस्य वसन्तशोभेव वसन्तसेना॥**[6]

अस्य श्लोकस्य भावार्थः- पुरातनकाले अवन्तिपुरी नाम नगरम् आसीत्। तत्र युवा, परन्तु दरिद्रः, द्विजवाणिकः चारुदत्तः नामकः पुरुषः आसीत्। तस्य उत्तमगुणेषु अनुरक्ता वसन्तशोभेव वसन्तसेना नाम गणिका आसीत्।

एवं मृच्छकटिके चित्रितं चारुदत्तस्य चरित्रं आदर्शमानवस्य पूर्णप्रतिमानम् अस्ति। सत्यनिष्ठा, त्यागभावना, करुणा, मानवता, आध्यात्मिकता च अस्य चरित्रस्य मूलाधाराः सन्ति। अतः चारुदत्तः संस्कृतनाट्यसाहित्ये आदर्शचरित्रस्य उत्कृष्टं उदाहरणं मन्यते।

अपरञ्च शूद्रकविना मृच्छकटिके चारुदत्तवसन्तसेनयोः सात्विकप्रेम-प्रसङ्गं आधारं कृत्वा समग्रसमाजस्य यथार्थचित्रणं कृतम्। तदुक्तं -

**तयोरिदं सत्सुरतोत्सवाश्रयं**
**नयप्रचारं व्यवहारदुष्टताम्।**
**खलस्वभावं भवितव्यतां**
**तथा चकार सर्वं किल शूद्रको नृपः॥**[7]

अस्य श्लोकस्य भावार्थः-चारुदत्तवसन्तसेनयोः सात्विकप्रेम-प्रसङ्गस्य माध्यमेन शूद्रकः नीतिप्रचारं कृतवान्, दुष्टजनानां व्यवहारं प्रकटितवान्, खलानां स्वभावं निरूपितवान् तथा भाग्यचक्रस्य अनिवार्यतां प्रदर्शितवान्। अवन्तिपुरीनगरे तत्कालीनसमाजे या या परिस्थितयः आसन्, ताः सर्वाः अस्मिन् प्रकरणे यथार्थरूपेण अभिव्यक्ताः दृश्यन्ते।

अत्र पूर्वोक्ते प्रथमपद्ये आर्यचारुदत्तस्य आदर्शगुणप्रभावेण अवन्तिपुरीनगरे ख्यातिप्राप्ता गणिका अपि तस्मिन् प्रेमानुरक्ता आसीत् इति कथनात् तस्य आदर्शत्वं सुस्पष्टं भवति। द्वितीयपद्ये चारुदत्तस्य आदर्शगुणैः प्रभाविताभूता वसन्तसेना वसन्तशोभेव दरिद्रवाणिकस्य जीवनपथे आगच्छति। येन तयोः मध्ये सात्विकप्रेम अथवा सत्सुरतस्य प्रादुर्भावः दृश्यते। अस्मिन् प्रकरणे सत्सुरत-माध्यमेन, आदर्शप्रेमप्रसङ्गस्य आधारेण, शूद्रकेन लौकिकविषयान् उपजीव्य अवन्तिपुर्यां आदर्शसमाजस्य कल्पना कृता इति स्पष्टतया लक्षितुं शक्यते।

आर्यचारुदत्तस्य स्वभावः स्वयमेव आदर्शः अस्ति। सः विलासेन न दरिद्रतां प्राप्तः अपि तु दानप्रदानेन एव दरिद्रत्वं गतः। अत एव मृच्छकटिकस्य अष्टचत्वारिंशत्तमे श्लोके शूद्रकः शकारवचनं तिरस्कृत्य विटमाध्यमेन चारुदत्तस्य गुणसमूहं वर्णयति-

**दीनानां कल्पवृक्षः स्वगुणफलनतः सज्जनानां कुटुम्बी**
**आदर्शः शिक्षितानां सुचरितनिकषः शीलवेलासमुद्रः।**
**सत्कर्ता नावमन्ता पुरुषगुणनिधिर्दक्षिणोदारसत्त्वो**
**ह्येकः श्लाघ्यः स जीवत्यधिकगुणतया चोच्छ्वसन्तीव चान्ये॥**[8]

अस्य श्लोकस्य भावार्थः- चारुदत्तः दीनजनानां कृते दयादाक्षिण्यादिगुणफलप्रदत्वात् कल्पवृक्षसदृशः अस्ति। सः सज्जनानां बन्धुरिव भवति। शिक्षितानां मध्ये आदर्शरूपः, सदाचारिणां कृते परीक्षापाषाणसमानः अस्ति। यथा सागरः कदापि स्वसीमां नातिक्रामति, तथैव चारुदत्तः अपि सदाचारमर्यादां कदापि न उल्लङ्घयति। सः सर्वेषां प्रति आदरकर्ता, कस्यापि न अवमानकर्ता। दया, दाक्षिण्य, विनय, औदार्यादिगुणानां निधिरिव सः अस्ति। एतादृशविविधगुणसमाश्रयत्वात् सः एक एव प्रशंसनीयः। अन्ये तु तद्विपरीतरूपेण जीवनं धारयन्तीव दृश्यन्ते।

अत्र चारुदत्तस्य आदर्शत्वस्य पराकाष्ठारूपं दृश्यते। अत्यादर्शभावनया एव सः दरिद्रतां प्राप्तः। न केवलं दानशीलतया अपि तु दयादाक्षिण्यादिगुणैः, शीलसम्पत्त्या, विनयभावेन, सदाचारनिष्ठया, मर्यादापालनयुक्तया वृत्त्या च तस्य चरित्रं पूर्णतया अनुकरणीयं, समादरणीयं च भवति। अत एव तस्मै 'गुणनिधिः' इति विशेषणं सर्वथा समुचितं मन्यते।

आदर्शस्य अपरं प्रमुखं वैशिष्ट्यं आध्यात्मिकी भावना अपि अस्ति। प्रकरणे चारुदत्तस्य आध्यात्मिकदृष्टिः तस्य चरित्रस्य विशिष्टं भूषणं भवति। सः गृहस्थधर्मस्य अनिवार्यतां प्रतिपादयन् वदति-

**वयस्य! मा मैवम्। गृहस्थस्य नित्योऽयं विधिः।**
**तपसा मनसा वाग्भिः पूजिता बलिकर्मभिः।**
**तुष्यन्ति शमिनां नित्यं देवताः किं विचारितैः॥**[9]

अस्य भावार्थः- हे मित्र! एवं मा वद। गृहस्थस्य नित्यकर्तव्यरूपेण देवपूजा, वैश्वदेवकर्म, बलिकर्म च अवश्यं करणीयम्। व्रतनियमयुक्तया तपसाः, मनसा ध्यानस्य, वाणीभिः स्तुतिपाठस्य, पूजाकर्मभिः च अर्चिताः देवताः शान्तचित्तानां प्रति नित्यं सन्तुष्टा भवन्ति। अत्र तर्कवितर्कैः किं प्रयोजनम्? देवपूजाविषये तर्कः अनुचित एव।

चारुदत्तस्य एषः आदर्शभावः गृहस्थिनां कृते देवऋणमोक्षाय नित्यदेवपूजाया अनिवार्यतां प्रतिपादयति। नित्यपूजार्चनादि-कर्मविना गृहस्थजीवने विघ्नाः जायन्ते, देवाः असन्तुष्टा भवन्ति। जीवनं च निरुद्देश्यं भवति इति भावः अत्र सूचितः। आदर्शभावाधारेण चारुदत्तस्य चरित्रचित्रणे प्रकरणकर्तुः पूर्णं साफल्यं दृश्यते।

चारुदत्तः अद्भुतगुणसमुच्चयेन प्रकरणस्य प्रमुखचरित्ररूपेण अस्माकं समक्षं उपतिष्ठति। सामाजिकजीवनस्य आलोचनात्मक-परिस्थितौ अपि तस्य उद्देश्यं स्थिरप्रतिमावत् अविचलितं दृश्यते। हिन्दुदार्शनिकसामाजिकपरिधौ कस्यामपि स्थितौ सः दिव्यमान-वगुणयुक्तः, विचलनरहितः च भवति। लौकिकव्यवहारजीवने सः भूमिरिव विस्तृतशीलः, सहिष्णुः, कौटुम्बिकः, सामाजिकः च दृश्यते; तथैव स्वमहिमासंरक्षणे, मानवीयमूल्यरक्षणे च व्योमवत् विशालहृदयः, संवेदनाशीलः प्रभवविष्णु च दृश्यते।

एतादृशं सर्वाङ्गपूर्णमादर्शचरित्रं सम्पूर्णसंस्कृतरूपकसाहित्ये अन्यत्र दुर्लभमेव। चारुदत्तः अभिजातकुलोत्पन्नः ब्राह्मणः। व्यवसायतः सार्थवाहः सन्नपि सः सर्वदा ब्राह्मणधर्मनिष्ठः अस्ति। सः मध्यमवर्गीयनागरिकसमुदायस्य प्रतिनिधिरूपेण स्थितः। प्रणयराग-

विषये सः सर्वदा उदासीनः दृश्यते। चारुदत्तस्य गुणैः आकर्षिता वसन्तसेना तस्मै सर्वस्वसमर्पणे उत्सुका, स्वच्छन्दस्वतन्त्रा च दृश्यते, अतः प्रणयविषये सा सक्रिया अस्ति।

प्रकरणे चारुदत्तः वसन्तसेनायाः सौन्दर्याकृष्टः सन्नपि न रागान्धः भवति, न च विरहातुरः। प्रेमप्रसङ्गेऽपि सः उदारः, संयमी, आदर्शशीलः च दृश्यते। यथा-

**यया मे जनितः कामः क्षीणे विभवविस्तरे।**
**क्रोधः कुपुरुषस्येव स्वगात्रेष्वेव सीदति॥**[10]

अस्य भावार्थः- वसन्तसेनया मम सम्भोगाभिलाषः उत्पन्नः परन्तु विभवविस्तारस्य क्षये सः कुपुरुषस्य क्रोध इव स्वदेहे एव विनश्यति। अत्र चारुदत्तः रागजन्ये सम्भोगाभिलाषेऽपि निरपेक्षः, दयावान्, सहृदयः च कर्मनिष्ठरूपेण प्रतिभाति।

अत एव चारुदत्तः सात्त्विकगुणयुक्तः, सरलः, एकरसः, सहृदयनागरिकः च दृश्यते। सः अत्यधिकविलासं, श्रृङ्गारं वा न इच्छति। न च सः पराक्रमसाहसप्रधानः नायकः अस्ति। अपि तु साधारणनागरिकरूपेण एव स्वकीयं जीवनं यापयति। अत एव सः ख्यात्यपेक्षया गुणप्रधानतां स्वीकरोति। तथापि तस्य मार्मिक-व्यक्तित्वेन प्रकरणे नायकरूपेण उदात्तनायकत्वं पूर्णतया स्थापितं दृश्यते।

चारुदत्तः कुलीनः, सुसभ्यः, सच्चरित्रवान् नागरिकयुवकः अस्ति। स्वीयैः आदर्शगुणैः सः समग्रावन्तिपुरीनिवासिनां हृदयानि जयति। अत्यधिकदानशीलतया सः दरिद्रतां प्राप्तः। धननाशेऽपि याचकाः तस्य गृहम् न परित्यजन्ति इति तस्य आन्तरिकवेदना नास्ति किन्तु अभ्यागतानामनागमनमेव तस्य दुःखकारणं भवति। यथा-

**एतत्तु मां दहति यत् गृहमस्मदीयं**
**क्षीणार्थमित्यतिथयः परिवर्जयन्ति।**
**संशुष्कसान्द्रमदलेखमिव भ्रमन्तः**
**कालात्यये मधुकराः किरणः कपोलम्॥**[11]

अस्य भावार्थः- धनहीनः इति मत्वा अतिथयः मम गृहम् त्यक्त्वा अन्यत्र गच्छन्ति। एतदेव मां दहति। यथा मधुकराः मधुक्षयकाले शुष्कमदलेखयुक्तं गजकपोलं परित्यजन्ति तथैव अतिथयः अपि मम गृहं परित्यजन्ति।

अत्र चारुदत्तस्य चिन्ता धननाशविषये न अपि तु अतिथिसत्कारस्य अभावविषये एव केन्द्रिता अस्ति। स्वाभिमानः अपि आदर्शचरित्रस्य प्रमुखं वैशिष्ट्यं भवति। तस्य सूक्ष्मवेदना स्वभिमानेपि दृश्यते। यथा :-

**वैदेश्येन कृतो भवेन्मम गृहे व्यापारमभ्यस्यता**
**नासौ वेदितवान् धनैर्विरहितं विस्रब्धसुप्तं जनम्।**
**दृष्ट्वा प्राङ्महतीं निवासरचनामस्माकमाशान्वितः**
**सन्धिच्छेदनखिन्न एव सुचिरं पश्चान्निराशो गतः।।**[12]

अस्य श्लोकस्य भावः- वैदेशिकजनानां सन्धिच्छेदनकार्ये अभ्यासं कुर्वता केनचित् चोरेण मम गृहे व्यापारः कृतः स्यात् इति कल्पना जायते। स चोरः धनविरहितं निःशङ्कं सुप्तं गृहस्थं न अवगच्छत्। पूर्वं विशालां सुन्दरां च चारुदत्तस्य गृहसंरचनां दृष्ट्वा स आशायुक्तः अभवत्, बहुकालपर्यन्तं सन्धिच्छेदनकर्म कुर्वन् परिश्रान्तः सन् अन्ततः निराशः एव प्रतिनिवृत्तः।

अत्र स्वाभिमानयुक्तस्य ब्राह्मणयुवकस्य चौरस्य कृते निर्वेदभावः स्पष्टतया दृश्यते। तथैव वैमानिकजनस्य अपि हृदये आदर्शभावना उत्पद्यते। चारुदत्तस्य संवेदनशीलता, सहृदयता च अत्र प्रकटितस्तः। चौरः यदा सन्धिविधौ कुशलः सन् आभूषणहरणे सफलः भवति, तदा स प्रसन्नतां अनुभवति।

आदर्शस्य अपरं वैशिष्ट्यं स्वाभिमानः अपि। चारुदत्तस्य स्वाभिमानः तदा विशेषतया प्रशंसनीयः भवति, यदा वसन्तसेनया प्रदत्तानि बहुमूल्यानि रत्नानि चोरहरणानन्तरं स्वपतिव्रताया भार्यायाः अवशिष्टेषु रत्नेषु केवलम् एकमेव बहुमूल्यरत्नं दातुमपि स न संकोचं अनुभवति। यथा-

**भैक्ष्येणाप्यर्जयिष्यामि पुनर्न्यासप्रतिक्रियाम्।**
**अनृतं नाभिधास्यामि चारित्रभ्रंशकारणम्।।**[13]

अस्य भावः- भिक्षाटनमाध्यमेनापि पुनः न्यासस्य प्रतिदानं सम्यक् सम्पादयिष्यामि, किन्तु चारित्रभ्रंशहेतुभूतं असत्यवचनं कदापि न करिष्यामि।

अत्र चारुदत्तः अभिघातभयेन अथवा स्वासामर्थ्यप्रकाशनभयेन असत्यवचनं कर्तुं न इच्छति। अत एव न्यासपूरणार्थं भिक्षाटनमपि श्रेयस्करं मन्यते। स्वाभिमानहानिभयात् स स्वपत्नीप्रदत्तं हारं प्रत्यक्षतया ग्रहीतुं न इच्छति। यद्यपि पत्नी उदारसत्या अस्ति। अप्रत्यक्षग्रहणेऽपि स खेदभावं स्पष्टतया प्रकाशयति। यथा-

**आत्मभाग्यक्षतद्रव्यः स्त्रीद्रव्येणानुकम्पितः।**
**अर्थतः पुरुषो नारी, या नारी सार्थतः पुमान्।।**
**विभवानुगता भार्या सुखदुःखसुहृद्भवान्।**
**सत्यञ्च न परिभ्रष्टं यद्दरिद्रेषु दुर्लभम्।।**[14]

भावः- स्वभाग्यविपर्ययेन विनष्टविभवः पतिः पत्न्या प्रदत्तेन धनेन अनुकम्पितः भवति। यः पत्नीधनाश्रयेण जीवति स अर्थतः नारीवद् भवति। या नारी पतिं सहायते सा सार्थतः पुरुषस्वरूपिणी भवति। पत्नी सम्पत्तौ विपत्तौ च पतिसहचरी, सुखदुःखयोः सुहृद्रूपा भवति। दरिद्रेषु सत्यपालनं दुर्लभं भवति, किन्तु चारुदत्तस्य सत्यं कदापि न परिभ्रश्यति।

चारुदत्तः जानाति यत् पत्नी सुखदुःखयोः सहचारिणी अस्ति। तथापि स स्वकर्तव्यपथात् विचलितुं न इच्छति। निर्धनावस्थायां विपत्तिकाले पत्नीधनग्रहणं पुंस्त्वहानिकरं मन्यते। अतः तद्द्रव्येण कृतसहाय्यः स स्वयमेव नारीपदं अवरुह्यते इति कल्पनां करोति। अत्र चारुदत्तस्य पौरुषादर्शः उत्तरदायित्वभावश्च सुस्पष्टं प्रकाशते। स जानाति यत् विपत्तिकाले उदारपत्नी मित्रवत् दुर्लभा भवति। सत्यादर्शस्य संरक्षणं पत्नीमित्रयोः साहाय्येनैव सम्भवति इति भावेन स सर्वत्र सौहार्दभावं प्रकटयति।

चारुदत्तः सत्यपालनं सर्वदा करोति। अत एव स मैत्रेयम् उद्दिश्य कथयति

**मैत्रेय! गच्छ रत्नावलीमादाय वसन्तसेनायाः सकाशम्। वक्तव्या च सा मद्वचनात्-यत् खल्वस्माभिः सुवर्णभाण्डमात्मीयमिति कृत्वा विश्रम्भाद् द्यूते हरितम्, तस्य कृते गृह्यतामियं रत्नावली इति।**[15]

एतेन उदाहरणेन चारुदत्तस्य स्वाभिमानः, सत्यनिष्ठा, व्यवहारशुद्धिः, अपूज्येष्वपि समाधानभावः च स्पष्टतया अभिव्यज्यते। आदर्शपुरुषरूपेण चारुदत्तः सतः विशुद्धस्य च प्रतीकः इति अवगम्यते। तस्य हृदये अपूर्वा त्यागभावना विद्यते। दयागुणात् स दयावीरः, दानगुणात् दानवीरः इति च अभिधातुं शक्यते।

तस्य आचरणे आध्यात्मिकी, सामाजिकी, व्यवहारिकी, नैयायिकी च वृत्तयः सुस्पष्टाः दृश्यन्ते। स धीरशीलः, सत्प्रणयी, साधारणः, सहृदयः, विवेकी च। संस्कृतरूपकसाहित्ये चारुदत्तस्य चरित्रे कापोलकल्पितः आदर्शः न दृश्यते अपि तु सर्वजनानां अनुसरणीयः अनुकरणीयश्च आदर्शः सः। चारुदत्तः मध्यमवर्गीयः सन् अपि व्यक्तिसत्ताधारितं विशिष्टं चरित्रं वहति। अस्मिन् प्रकरणे तस्य स्वभावाः गौणाः, मुक्ताः, व्यक्ताः इति त्रिविधरूपेण निरूपिताः। स अभिजातः, सुसंस्कृतः, शुचिः, विनयी, त्यागी, सभ्यनागरिकः, निर्मोहः, असङ्गयुक्तः, देशप्रेमी, कुटुम्बपरायणश्च दृश्यते।

**निष्कर्षः-**

'आदर्शः' इति शब्दस्य आङ्ग्लभाषायां 'Ideal' इति पर्यायः वर्तते। आङ्-उपसर्गपूर्वकात् दृश्-धातोः घञ्-प्रत्ययेन 'आदर्शः' इति शब्दः निष्पद्यते। प्राचीनकाले अयं शब्दः नैतिकदर्शनात्मकविचारप्रणालीषु प्रयुज्यते स्म। साहित्ये आदर्शचरित्रस्य प्रयोगः नैतिकाध्यात्मिक-मूल्यप्रकाशनार्थं क्रियते। मृच्छकटिकप्रकरणे चारुदत्तः आदर्शचरित्र-रूपेण प्रस्तुतः। प्रकरणकारेण मध्यमवर्गस्य धीरप्रशान्तस्य चारुदत्तस्य चयनं कृत्वा सम्पूर्णं नाट्यं तस्य आदर्शगुणैः प्रभावितं कृतम्। तेन आदर्शगुणबलात् स अवनतिपुरीस्थितानां जनानां हृदयानि जयति। दयादाक्षिण्ययुक्तः, आध्यात्मिकभावसमन्वितः, नैतिकः, स्वाभिमानी, दानशीलः च स चारुदत्तः संस्कृतरूपकसाहित्ये अनुपमं आदर्शचरित्रं प्रतिनिधित्वं करोति। एतादृशः मध्यमवर्गीयः ब्राह्मणनागरिकः आदर्शचरित्ररूपेण संस्कृतनाट्यसाहित्ये अन्यत्र दुर्लभः एव।

**सन्दर्भग्रन्थाः-**


१. आप्टे, वामन, शिवराम, सन् २००२, संस्कृत-हिन्दी शब्दकोशः, जयपुर : रचना प्रकाशन

२. जोशी, कुमार, वहादुर, वि.सं २०६६, पाश्चात्य साहित्यका प्रमुख वाद, ललितपुर : साझा प्रकाशन

३. थापा, मोहनहिमांशु, वि.सं २०३६, साहित्य परिचय, ललितपुर : साझा प्रकाशन

४. दास, श्यामसुन्दर, सन् २०१३, साहित्यालोचन, दिल्ली : भारतीय ज्ञानपीठ

५. पराजुली, कृष्ण, प्रसाद (सम्पा.) वि.सं २०६७, नेपाली बृहत् शब्दकोश, काठमाडौं : नेपाल प्रज्ञा प्रतिष्ठान

६. बाहरी, हरदेव, सन् २००६, राजपालः संक्षिप्त हिन्दी शब्दकोशः, दिल्ली : राजपाल एण्ड सन्ज

७. मिश्र, शोभाकान्त, सन् २०१२, पाश्चात्य काव्य चिन्तन, पटना : अनुपम प्रकाशन

८. शुद्रकः, सन्. १९९९, मृच्छकटिकम् (षष्ठम. सं) जगदिश्चन्द्रमिश्र (सम्पा.), वाराणसी : चौखम्बा सुरभारती प्रकाशन

९. श्रीवास्तव, अर्चना, सन् २००३, भारतीय तथा पाश्चात्य काव्यशास्त्र, वाराणसी : विश्यविद्यालय प्रकाशन

१०. त्रिपाठी, राममूर्ति, सन् २०१५, साहित्यशास्त्र के प्रमुख पक्ष, दिल्ली : वाणी प्रकाशन


**पाद टिप्पणीः -**

1 वामन, शिवराम आप्टे, सन् २००२, संस्कृत-हिन्दी शब्दकोशः, जयपुर : रचना प्रकाशन, पृ. १४६

2 धूमेनाव्रियते वह्निर्यथादर्शो मलेन च। (द्रष्टव्यम्)

3 हरदेव, बाहरी, सन् २००६, राजपालः संक्षिप्त हिन्दी शब्दकोशः, दिल्ली : राजपाल एण्ड सन्ज, पृ. ५५

4 कृष्ण, प्रसाद पराजुली (सम्पा.) वि.सं २०६७, नेपाली बृहत् शब्दकोश, काठमाडौं : नेपाल प्रज्ञा प्रतिष्ठान, पृ. १०१

5 कुमार, वहादुर जोशी, वि.सं २०६६, पाश्चात्य साहित्यका प्रमुख वाद, ललितपुर : साझा प्रकाशन, पृ. २८

6 शुद्रकः, सन्. १९९९, मृच्छकटिकम्(षष्ठम. सं) जगदिश्चन्द्रमिश्र (सम्पा.), वाराणसी : चौखम्बा सुरभारती प्रकाशन, पृ. ९

7 शुद्रक, सन् १९९९, पूर्ववत्, पृ. १०

8 शुद्रक, सन् १९९९, पूर्ववत्, पृ. ६९

9 शुद्रक, सन् १९९९, पूर्ववत्, पृ. ३१

10 शुद्रक, सन् १९९९, पूर्ववत्, पृ. ८०

11 शुद्रक, सन् १९९९, पूर्ववत्, पृ. २७

12 शुद्रक, सन् १९९९, पूर्ववत्, पृ. १६७

13 शुद्रक, सन् १९९९, पूर्ववत्, पृ. १७१

14 शुद्रक, सन् १९९९, पूर्ववत्, पृ. १७६

15 शुद्रक, सन् १९९९, पूर्ववत्, पृ. १७७